श्री दुर्गा स्तोत्रं (श्रीकृष्ण कृतं)

श्री दुर्गा स्तोत्रं (श्रीकृष्ण कृतं)

श्रीकृष्ण उवाच |
त्वमेव सर्वजननी मूलप्रकृतिरीश्वरी |
त्वमेवाद्या सृष्टिविधौ स्वेच्छया त्रिगुणात्मिका || 1 ||

कार्यार्थे सगुणा त्वं च वस्तुतो निर्गुणा स्वयं |
परब्रह्मस्वरूपा त्वं सत्या नित्या सनातनी || 2 ||

तेजः स्वरूपा परमा भक्तानुग्रविग्रहा |
सर्वस्वरूपा सर्वेशा सर्वाधारा परात्परा || 3 ||

सर्वबीजस्वरूपा च सर्वपूज्या निराश्रया |
सर्वज्ञा सर्वतोभद्रा सर्वमंगळमंगळा || 4 ||

सर्वबुद्धिस्वरूपा च सर्वशक्तिस्वरूपिणी |
सर्वज्ञानप्रदा देवी सर्वज्ञा सर्वभाविनी || 5 ||

त्वं स्वाहा देवदाने च पितृदाने स्वधा स्वयं |
दक्षिणा सर्वदाने च सर्वशक्तिस्वरूपिणी || 6 ||

निद्रा त्वं च दया त्वं च तृष्णा त्वं चात्मनः प्रिया |
क्षुत् क्षांतिः शांतिरीशा च कांतिस्तुष्टिश्च शाश्वती || 7 ||

श्रद्धा पुष्टिश्च तंद्रा च लज्जा शोभा दया तथा |
सतां संपत्स्वरूपा श्रीर्विपत्तिरसतामिह || 8 ||

प्रीतिरूपा पुण्यवतां पापिनां कलहांकुरा |
शश्वत्कर्ममयी शक्तिः सर्वदा सर्वजीविनां || 9 ||

देवेभ्यः स्वपदो दात्री धातुर्धात्री कृपामयी |
हिताय सर्वदेवानां सर्वासुरविनाशिनी || 10 ||

योगिनिद्रा योगरूपा योगदात्री च योगिनां |
सिद्धिस्वरूपा सिद्धानां सिद्धिदा सिद्धयोगिनी || 11 ||

माहेश्वरी च ब्रह्माणी विष्णुमाया च वैष्णवी |
भद्रदा भद्रकाली च सर्वलोकभयंकरी || 12 ||

ग्रामे ग्रामे ग्रामदेवी गृहदेवी गृहे गृहे |
सतां कीर्तिः प्रतिष्ठा च निंदा त्वमसतां सदा || 13 ||

महायुद्धे महामारी दुष्टसंहाररूपिणी |
रक्षास्वरूपा शिष्टानां मातेव हितकारिणी || 14 ||

वंद्या पूज्या स्तुता त्वं च ब्रह्मादीनां च सर्वदा |
ब्रह्मण्यरूपा विप्राणां तपस्या च तपस्विनां || 15 ||

विद्या विद्यावतां त्वं च बुद्धिर्बुद्धिमतां सतां |
मेधा स्मृतिस्वरूपा च प्रतिभा प्रतिभावतां || 16 ||

राज्ञां प्रतापरूपा च विशां वाणिज्यरूपिणी |
सृष्टौ सृष्टिस्वरूपा त्वं रक्षारूपा च पालने || 17 ||

तथांते त्वं महामारी विश्वे विश्वैश्च पूजिते |
कालरात्रिर्महारात्रिर्मोहरात्रिश्च मोहिनी || 18 ||

दुरत्यया मे माया त्वं यया सम्मोहितं जगत् |
यया मुग्धो हि विद्वांश्च मोक्षमार्गं न पश्यति || 19 ||

इत्यात्मना कृतं स्तोत्रं दुर्गाया दुर्गनाशनं |
पूजाकाले पठेद्यो हि सिद्धिर्भवति वांछिता || 20 ||

इति श्रीब्रह्मवैवर्ते महापुराणे द्वितीये प्रकृतिखंडे नारदनारायणसंवादे दुर्गोपाख्याने षट्षष्टितमोऽध्याये श्री दुर्गा स्तोत्रं |